**MAVYC 401**

**वैयाकरणभूषणसारः -1**

**प्रथमपत्रम्**

**क्रेडिट – 6 , अङ्काः 80**

**प्रथमघटकः -**

**अतिलघूत्तरीयप्रश्नाः – (1 अङ्कात्मकाः)**

1. बृहद्वैयाकरणभूषणसारः कस्य कृतिः ?
2. स्तुतीत्यस्य कोऽर्थः ?
3. नैयायिकाः धात्वर्थत्वं कीदृशं मन्यन्ते ?
4. कर्तृप्रत्ययस्थले कः प्रथमान्तार्थः ?
5. कालस्य कुत्रान्वयः ?
6. संख्यायाः कुत्रान्वयः ?
7. नैयायिकमते कृति: का ?
8. नैयायिकमते धात्वर्थः कस्य विशेषणम् ?
9. नैयायिकमते कीदृशः शाब्दबोधः कर्तृप्रत्ययस्थले ?
10. कर्मप्रत्ययस्थले च कीदृशः शाब्दबोधः नैयायिकमते ?
11. साध्यत्वं किम् ?
12. नानार्थत्वं किम् ?

**लघूत्तरीयप्रश्नाः – (6 अङ्कात्मकाः)**

1. वैयाकरणभूषणसारग्रन्थे कति प्रकरणानि सन्ति? लिखत?
2. वैयाकरणभूषणसारस्य मंगलाचरणं विलिख्य व्याख्या कार्या।
3. फलव्यापारयोर्धातु.... इत्यस्य ग्रन्थदिशा व्याख्या विधेया।
4. प्राचीनवैयाकरणमते कीदृशः शाब्दबोधः ?
5. नव्यवैयाकरणमते कीदृशः शाब्दबोधः ?
6. वाक्यपदीयानुसारेण क्रिया का ? व्याख्यायत।
7. कर्म कतिविधम् ? संक्षेपेण व्याख्यायत।

**दीर्घोत्तरीयप्रश्नाः – (10 अङ्कात्मकाः)**

1. वैयाकरणभूषणसारस्य कर्तुः परिचयः प्रदेयः ?
2. "यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते" इति कारिकायाः क आशय: ? व्याख्यायत।
3. तिङर्था: के ? तेषां परम्पराऽन्वयप्रदर्शनपूर्वकं वैयाकरणनैयायिकमीमांसकमते शाब्दबोधे वैलक्षण्यं कथम्? इति निरुपणीयम् ।
4. आख्यातार्थस्य कुत्रान्वयः ? सयुक्तिकमनूद्यान्येषां मतं प्रदूष्य स्वमन्तमुपस्थाप्यताम् ?
5. भ्वादयो धातवरिति सूत्रे क्रियापदेन कस्य ग्रहणमिति उपस्थाप्यताम् ?

**द्वितीयघटकः -**

**अतिलघूत्तरीयप्रश्नाः – (1 अङ्कात्मकाः)**

1. कालस्तु कुत्र विशेषणम् ?
2. साध्यत्वेनोपस्थिता क्रिया कस्य रूपं धारयति?
3. सिद्धक्रियायां कस्योपस्थितिः भवति?
4. सम्बोधनपदं कुत्र विशेषणम् ?
5. एकतिङ् वाक्यम् इति केनोक्तम् ?
6. हेलाराजेन वाक्यस्य लक्षणं किमुक्तम् ?
7. अकर्मिका क्रिया कुत्र भवति ?
8. क्रिया का ?

**लघूत्तरीयप्रश्नाः – (6 अङ्कात्मकाः)**

1. फलव्यापारयोरेकनिष्ठतायामकर्मकः.... इत्यादि कारिका व्याख्येया।
2. साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना.... इत्यादि कारिका व्याख्येया।
3. अविग्रह्य गतादिस्था यथा ग्रामादिकर्मभिः ।
   क्रिया सम्बध्यते तद्वत् कृतपूर्व्यादिषुस्थिता ॥ कारिकेयं सप्रसङ्गं व्याख्यायताम् ?
4. भूषणदिशा उपाधिभेदत्वं निरूपयत।

**दीर्घोत्तरीयप्रश्नाः – (10 अङ्कात्मकाः)**

1. अस्त्यादावपि धर्म्यंशे भाव्येऽस्त्येव हि भावना ।
   अन्यत्राशेषभावात्तु सा तथा न प्रकाशते ॥ कारिकेयं सोदाहरणं व्याख्यायताम् ?
2. फलव्यापारयोरेकनिष्ठतायामकर्मक........ इति कारिका व्याख्येया ?
3. घञादिभिः सिद्धत्वेनाभिधाने किं प्रमाणम् ? भूषणदिशा व्याख्यायत।
4. कारकाणां भावनायामेवान्वयः इति सिद्धान्तो ग्रन्थ रीत्योपस्थाप्यताम् ?
5. भेद्यभेदकसम्बन्धोपाधीति कारिका व्याख्येया ?

**तृतीयघटकः –**

**अतिलघूत्तरीयप्रश्नाः – (1 अङ्कात्मकाः)**

1. वर्तमानस्य लक्षणं किम् ?
2. अभावस्य कति भेदाः ?
3. कालस्य कति भेदाः ?
4. ‘विधिः’ इत्यस्य कोऽर्थः?
5. ‘निमन्त्रणम्’ इत्यस्य कोऽर्थः?
6. ‘आमन्त्रणम्’ इत्यस्य कोऽर्थः?
7. ‘अधीष्टः’ इत्यस्य कोऽर्थः?
8. किन्नाम प्रवर्तनात्त्वम् ?
9. ‘पुंसां नेष्टाभ्युपायत्वात्’ इति केनोक्तम्?
10. अद्यतनकालः कतिविधः ?

11. अनद्यतनकालः कतिविधः ?
12. मीमांसकाः पञ्चमलकारेण कं लकारं स्वीकुर्वन्ति ?

**लघूत्तरीयप्रश्नाः – (6 अङ्कात्मकाः)**

1. वर्तमानत्वं किम् ? संक्षेपेण वर्ण्यताम् ।
2. परोक्षत्वं किम् ? संक्षेपेण ज्ञाप्यताम् ।
3. अनद्यतनत्वं भूषणदिशा निरूपयत ।
4. अद्यतनत्वं भूषणदिशा निरूपयत ।
5. किन्नाम कालत्वमिति व्याख्यायत ।
6. 'विधिनिमन्त्रणामन्त्रणाद्यर्थेषु लिङ्' अस्य व्याख्या संक्षेपेण क्रियताम् ?
7. प्रवर्तनात्वं किम् ?

**दीर्घोत्तरीयप्रश्नाः – (10 अङ्कात्मकाः)**

1. वर्तमाने परोक्षे श्वो भाविन्यर्थे भविष्यति ... इति विस्तरेण व्याख्यायत ।
2. वर्तमानत्वं किम् ? तत्प्रत्ययवाच्यं प्रकृतिवाच्यं वेति ? ग्रन्थदिशा व्याख्यायत।
3. परोक्षत्वं किमिति परिष्कृत्य तिङर्थो निरूपणीयः ?
4. कौण्डभट्टमते कालः कतिविध: ? सविस्तरं निरूप्यताम् ?
5. भूषणदिशा लृङर्थो निरूप्यताम् ?
6. प्रवर्तनात्वं भूषणदिशा व्याख्यायत

**चतुर्थघटकः** –

**अतिलघूत्तरीयप्रश्नाः – (1 अङ्कात्मकाः)**

1. 'सर्वं नाम धातुजाह' इति केनोक्तम् ?
2. 'घटं जानाति' इत्यस्मिन् वाक्ये ज्ञाधातोः कोऽर्थः ?
3. कर्म कतिविधम् ?
4. निर्वर्त्यकर्मणः उदाहरणं किम् ?
5. विकार्यकर्मणः उदाहरणं किम् ?
6. प्राप्यकर्मणः उदाहरणं किम् ?
7. उदासीनकर्मणः उदाहरणं किम् ?
8. द्वेष्यकर्मणः उदाहरणं किम् ?
9. संज्ञैरनाख्यातकर्मणः उदाहरणं किम् ?
10. अन्यपूर्वककर्मणः उदाहरणं किम् ?
11. तदुद्देश्यकत्वं किम् ?
12. वाक्यपदीयकारमते सम्प्रदानस्य कति भेदाः?

**लघूत्तरीयप्रश्नाः – (6 अङ्कात्मकाः)**

1. तिरोभावाभ्युपगमे भावानां सैव नास्तिता।
   लब्धक्रमे तिरोभावे नश्यतीति प्रतीयते ॥ अस्याः कारिकायाः व्याख्या कार्या ?
2. भूषणदिशा सप्तविधं कर्म निरूपयत।
3. कर्तृत्वम् किम् ? इति भूषणदिशा व्याख्यायत।
4. भूषणदिशा करणतृतीयार्थो निरूप्यताम्।
5. सप्तम्याः कोऽर्थः ? भूषणानुसारं व्याख्यायत।
6. पञ्चम्याः कोऽर्थः ? भूषणानुसारं व्याख्यायत।
7. सुपां कर्मादयोप्यर्था संख्या चैव तथा तिङाम् इति ग्रन्थदिशा व्याख्यायत।

**दीर्घोत्तरीयप्रश्नाः – (10 अङ्कात्मकाः)**

1. आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा।
   यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः ।। अस्याः कारिकायाः व्याख्या कार्या ?
2. ‘अतीताऽनागतादिपरोक्षस्थलेऽपि ज्ञानजन्यस्य तस्यावश्यकत्वात्' अस्य कः आशयः ? भूषणदिशा व्याख्यायत।
3. फलाश्रयत्वस्य कर्मत्व स्वीकारे प्रयागात् काशीं गच्छति चैत्रे-चैत्रे प्रयागयोरापतितं कर्मत्वं वार्यताम् ?
4. पञ्चमीविभक्त्यर्थं निरुप्य ‘परस्परान्मेषावपसरत' इति ग्रन्थकारस्य सिद्धान्तो निरूपणीयः ?
5. चतुर्थ्यर्थं निरुप्य 'वरुणाय दण्डं प्रयच्छती’ति विहितं दण्डदानं किं प्रतिपत्तिकर्म उत अर्थकर्म ? व्याख्यायत।

**पञ्चमघटकः –**

**अतिलघूत्तरीयप्रश्नाः – (1 अङ्कात्मकाः)**

1. नामार्थाः कति ?
2. एकमिति पदेन किं गृह्यते ?
3. त्रिकमिति पदेन किं स्वीक्रियते ?
4. वस्तुपदे किं लिङ्गम् ?
5. चतुष्कं किम् ?
6. पञ्चकं किम् ?
7. सर्वं ज्ञानं केन भाषते ?
8. ग्राह्यत्वं किम् ?
9. ग्राहकत्वं किम् ?

**लघूत्तरीयप्रश्नाः – (6 अङ्कात्मकाः)**

1. जातिः नामार्थः इति पक्षं भूषणदिशा निरूपणीयम्
2. पुंस्त्वादीनां स्वरूपं प्रदर्श्य शब्दगतत्वमर्थगतत्वं वेति लिङ्गं विवेचनीयम् ?
3. शब्दोऽपि यदि भेदेन विवक्षा स्यात् तदा तथा।
   नोचेच्छ्रोत्रादिभिः सिद्धोऽप्यसावर्थो व भासते ।। अस्याः कारिकायाः व्याख्या कार्या ?
4. शब्दस्य प्रातिपदिकार्थत्वे किम्मानम् ?
5. व्यभिचारदोषं निरूपयत।

**दीर्घोत्तरीयप्रश्नाः – (10 अङ्कात्मकाः)**

1. एकं त्रिकं चाथ चतुष्कं पञ्चकं तथा।
   नामाऽर्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः ॥ अस्याः कारिकायाः व्याख्या कार्या ?
2. संख्याकारकयोर्वाच्यं प्रातिपदिकं वा प्रत्यय इति विविच्यताम् ?
3. अनुकार्यानुकरणयोर्भेदाभेदौ ग्रन्थदिशा निरूपणीयौ।
4. शब्दस्य प्रातिपदिकार्थत्वे किम्मानम् ?

**MAVYE 404**

**शोधप्रविधिः**

**चतुर्थपत्रम्**

**क्रेडिट – 3 , अङ्काः40**

**प्रथमघटकः -**

**अतिलघूत्तरीयप्रश्नाः – (1 अङ्कात्मकाः)**

1. अनुसन्धानं किम् ?
2. अनुसन्धानम् इत्यत्र को धातुः?
3. अनुसन्धानम् इत्यत्र कः प्रत्ययः ?
4. शोधसंज्ञा का ?
5. शोधः इत्यत्र को धातुः ?
6. शोधः इत्यत्र कः प्रत्ययः ?
7. आङ्ग्लभाषायाम् अनुसन्धानमिति शब्दस्य रूपान्तरं किम् ?
8. अन्वेषणम् इत्यत्र को धातुः ?
9. व्याख्यात्मकमनुसन्धानं किम् ?
10. व्यावहारिकमनुसन्धानं किम् ?
11. तुलनात्मकमध्ययनमाधारीकृत्य सर्वादौ शोधप्रबन्धः कदा उपस्थापितः?
12. रामचरितमानसेन सह रामायणस्य तुलनात्मकमध्ययनम् इति शोधप्रबन्धः केन उपस्थापितः ?
13. रामचरितमानसेन सह रामायणस्य तुलनात्मकमध्ययनम् इति शोधप्रबन्धः कस्मिन् विश्वविद्यालये समर्पितः ?
14. शास्त्रीयशोधपद्धतिः का?
15. रुचिसिद्धान्तस्योपयोगः कुत्र क्रियते ?
16. उपयोगितासिद्धान्तस्योपयोगः कुत्र क्रियते ?
17. प्रश्नावलीप्रस्तुतीकरणम् इति कस्मै अत्युत्तमं माध्यमं भवति?
18. श्रीजगन्नाथज्योतिः इति संस्कृतशोधपत्रिका कुतः प्रकाश्यते ?
19. संस्कृतविमर्शः इति संस्कृतशोधपत्रिका कुतः प्रकाश्यते ?
20. सागरिका इति संस्कृतशोधपत्रिका कुतः प्रकाश्यते ?
21. शोधप्रभा इति संस्कृतशोधपत्रिका कुतः प्रकाश्यते ?
22. वागीश्वरी इति संस्कृतशोधपत्रिका कुतः प्रकाश्यते ?
23. संस्कृतविद्या इति संस्कृतशोधपत्रिका कुतः प्रकाश्यते ?
24. सारस्वती सुषमा इति संस्कृतशोधपत्रिका कुतः प्रकाश्यते ?
25. पत्रीकरणं किम् ?
26. भाषान्तरीकरणं किम्?
27. अनुकृतिः इति कस्य  रूपमस्ति?
28. लिप्यन्तरीकरणे ā इत्यस्य कोर्थः?
29. लिप्यन्तरीकरणे ‘अं’ इत्यस्य चिह्नं किम् ?
30. मुद्रणसंशोधने d/ इति सङ्केतस्य प्रयोगः किमर्थः ?
31. मुद्रणसंशोधने = इति सङ्केतस्य प्रयोगः किमर्थः ?

**लघूत्तरीयप्रश्नाः – (6 अङ्कात्मकाः)**

1. अनुसन्धानं किम् ? इति निरूपयत।
2. ऐतिहासिकम् अनुसन्धानं किम् ? संक्षेपेण निरूपयत।
3. तुलनात्मकम् अनुसन्धानं संक्षेपेण व्याख्यायत।
4. शास्त्रीयपद्धतिः इत्यस्मिन् विषये टिप्पणीं लिखत।
5. उपयोगितासिद्धान्तस्य निरूपणं कुरुत।
6. शोधकार्ये संस्कृतपत्रिकाणामुपयोगः अस्ति नवेति निरूपयत।
7. पत्रीकरणं किम् ? निरूपयत।
8. पादटीका इत्यस्य विश्लेषणं कुरुत।
9. ताडपत्रमातृकाप्रस्तुतीकरणविधिः इत्यस्मिन् विषये टिप्पणीं ददातु।
10. कार्गजमातृकाप्रस्तुतीकरणविधिः कः? व्याख्यायत।
11. भावानुवादस्य तात्पर्यं निरूपयत।
12. आक्षरिकानुवादस्य तात्पर्यं निरूपयत।
13. शीर्षकपृष्ठं किम् ? व्याख्यायत।
14. साङ्केतिकशब्दसूचीनिर्माणे के नियमाः सन्तीति संक्षेपेण प्रतिपादयत।
15. परिशिष्टभागस्य तात्पर्यं व्याख्यायत।

**दीर्घोत्तरीयप्रश्नाः – (10 अङ्कात्मकाः)**

1. शोधस्य प्रकृतीनां निरूपणं कुरुत।
2. अनुसन्धानस्य पद्धतीः निरूपयत।
3. शोधकर्तुः कृते आवश्यकाः गुणाः के ? व्याख्यायत।
4. शोधविषयनिर्वाचनस्य सिद्धान्तानां निरूपणं कुरुत।
5. प्रकल्पसंरचा इत्यस्मिन् विषये एको निबन्धो लेख्यः।
6. तथ्यसंग्रहणे स्वीकृताः उपायाः के ? व्याख्यायत।
7. शोधकार्ये मातृकायाः प्रयोगविषये एको निबन्धो लेख्यः।
8. भाषान्तरीकरणं किम् ? व्याख्यायत।
9. भाषान्तरीकरणस्य प्रकारान् प्रतिपादयत।
10. लिप्यन्तरीकरणे वर्णसङ्केतविधेः महत्त्वं प्रतिपादयत।
11. मुद्रणसंशोधनं किम् ? व्याख्यायत।
12. शोधप्रबन्धस्य निर्माणस्य प्रविधिं निरूपयत।
13. सहायकग्रन्थसूचीनिर्माणे कः प्रविधिः ? व्याख्यायत।

**DEPARTMENT OF SANSKRIT VYAKARNA**
**PROGRAMME: MASTER OF ARTS**
**SEMESTER: IV SEMSETER**

| SL. NO. | QUESTION |
|---|---|
| | **SHORT QUESTION** |
| 1 | कारकप्रकरणस्यापरं नाम किम् ? |
| 2 | लघुशब्देन्दुशेखरस्य प्रणेता कः ? |
| 3 | इदमपि सूत्रं क्रियायोगे एव प्रवर्तते इदं पदेन कस्य ग्रहणम् ? |
| 4 | भट्टोजिदीक्षितमते प्रातिपदिकार्थः कः ? |
| 5 | आचार्यनागेशभट्टमते प्रातिपदिकार्थः कः ? |
| 6 | अभेदसंसर्गेण इत्यस्य किं तात्पर्यम् ? |
| 7 | स्त्रीशब्दे कथं प्रथमासिद्ध्यति ? |
| 8 | वचनग्रहणं किमर्थम् ? |
| 9 | सम्बोधनं किम् ? |
| 10 | राजा भव युद्ध्यस्व प्रयोगः कस्य कृते ? |
| 11 | करोति क्रियां निर्वर्तयतीति व्युत्पत्तिः कुत्र श्रूयते ? |
| 12 | घटं करोति इत्यत्र घटस्य कथं कर्मसंज्ञा ? |
| 13 | कर्तुरीप्सिततमं कर्म इति सूत्रे ईप्सितपदं क्रियापरमभिप्रेतपरं वा ? |
| 14 | ईप्सितशब्दे प्रकृतिप्रत्ययविभागः कः ? |
| 15 | कारके इति सूत्रे कीदृशी सप्तमी ? |
| 16 | ईप्सिततमत्वञ्च किम् ? |

| | |
|---|---|
| 17 | कर्मपदेन कस्य ग्रहणं भवति ? |
| 18 | शत्यः इत्यस्यार्थः कः ? |
| 19 | धातोः पञ्चार्थाः के ? |
| 20 | हरिं भजति इत्यस्य कोर्थः ? |
| 21 | तथायुक्तं चानीप्सितम् इति सूत्रे तथायुक्तपदार्थः कः ? |
| 22 | अनीप्सितपदस्य कोऽर्थः? |
| 23 | अनीप्सितं कति विधम् ? |
| 24 | अकथितञ्च सूत्रे अकथितपदं कमर्थं बोधयति ? |
| 25 | दुह्धातोः द्विव्यापारपक्षे गामित्यस्य केन सूत्रेण कर्मसंज्ञा ? |
| 26 | अर्थनिबन्धनेयं संज्ञा कस्य मतम् ? |
| 27 | गतिबुद्धिसम्पूर्णं सूत्रं लिख्यताम् ? |
| 28 | भक्षयति बलीवर्दान् इत्यत्र भक्षधातोः कुत्र वृत्तिः ? |
| 29 | स्वतन्त्रः कर्ता अत्र स्वातन्त्र्यं कुत्र ? |
| 30 | रामेण बाणेन हतो बाली अत्र रामेणेत्यत्र कीदृशी तृतीया ? |
| 31 | येनाङ्गविकारः इत्यत्र अङ्गपदेन कस्य ग्रहणम् ? |
| 32 | हेतौ इति सूत्रे हेतुपेदन किं ज्ञायते ? |
| 33 | कर्मणा यमभिप्रैति स सम्प्रदानमित्यत्र अभिप्रैतिपदार्थः कः? |
| 34 | धारेरुत्तमर्णः इत्यत्र धारिपदे कःधातुः? |

| | |
|---|---|
| 35 | तादर्थ्ये चतुर्थीति पदे तादर्थ्यपदार्थः कः? |
| 36 | क्रियार्थम् पदस्य किं निर्वचनम् ? |
| 37 | अलम् कस्मिन्नर्थे प्रयुक्तं विद्यते ? |
| 38 | गत्यर्थकर्मणि द्वितीयचतुर्थ्यौ चेष्टायामनध्वनि अत्र चेष्टा कीदृशी ? |
| 39 | ध्रुवमपायेऽपादानमित्यत्र ध्रुवापायौ पदार्थौ कौ स्तः? |
| 40 | माथुराः पाटलिपुत्रकेभ्य आढ्यतराः इत्यत्र कीदृशः विभागः विवक्षितः? |
| 41 | भीत्रार्थानां भयहेतुः इत्यत्र भीत्रपदेन किं ज्ञायते ? |
| 42 | आख्यातोपयोगे इति सूत्रे उपयोगपदार्थः कः ? |
| 43 | अधीगर्थदयेशां कर्मणि इत्यत्र अधीर्थपदार्थः क? |
| 44 | न लोकाव्ययनिष्ठाखलर्थतृनाम् इत्यत्र लपदेन कस्य ग्रहणम् ? |
| 45 | सप्तम्यधिकरणे च इति सूत्रे चकारेण किं बुध्यते ? |
| 46 | निमित्तात् कर्मयोगे इत्यत्र निमित्तं किम् ? |
| 47 | षष्ठी चानादरे इत्यत्र कीदृशी सप्तमी ? |
| 48 | अधिरीश्वरे इति सूत्रे अध्यर्थः कः ? |
| 49 | कारकप्रकरणस्यापरं नाम किम् ? |
| 50 | अधिकरणं कतिविधम् |
| | SHORT NOTE |
| 1 | प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा इति सूत्रे लिङ्गग्रहणं किमर्थमिति प्रतिपादयत। |

| | |
|---|---|
| 2 | सम्बोधने च सूत्रं किमर्थमारब्धमिति प्रतिपादयत। |
| 3 | इदमपि सूत्रं क्रियायोगे एव प्रवर्तते इति पङ्क्तिः व्याख्येया। |
| 4 | वचनग्रहणस्य चारितार्थ्यं कथमिति शेखरदिशा व्याख्यायत। |
| 5 | भट्टोजिदीक्षितसम्मतप्रातिपदिकार्थस्य खण्डनप्रकारं प्रदर्श्यताम्। |
| 6 | नागेशानुगुणं प्रातिपदिकार्थत्वं विविच्यताम्। |
| 7 | कर्तुरीप्सिततमं कर्म इति सूत्रं व्याख्यायताम्। |
| 8 | कर्तुरीप्सिततमं कर्म सूत्रे तमब्ग्रहणस्य फलं प्रतिपाद्यताम्। |
| 9 | कर्मणि द्वितीया सूत्रं सोदाहरणं विविच्यताम्। |
| 10 | पञ्चकं प्रातिपदिकार्थः इति पक्षे अनभिहिताधिकारस्य किं फलम्। |
| 11 | अभिधानञ्च प्रायेण तिङ्कृत्तद्धितसमासैरिति व्याख्यायताम्। |
| 12 | शत्यः इति उदाहरणं संगतमसङ्गतमिति स्पष्टीक्रियताम्। |
| 13 | तथायुक्तं चानीप्सितमिति सूत्रे तथायुक्तत्वञ्च संघट्यताम्। |
| 14 | अनीप्सितमित्यत्र समासप्रक्रियां प्रदर्श्य उदाहरणं दीयताम्। |
| 15 | अकथितञ्चेति सूत्रे अकथितपदार्थः विविच्यताम्। |
| 16 | दुह्याच्पच् इति कारिकां विलिख्य कतिपयान्युदाहरणानि स्पष्टीक्रियताम्। |
| 17 | गतिबुद्धीति सूत्रं विलिख्य समासपुरस्सरं सोदाहरणं निरूप्यताम्। |
| 18 | अधिशीङ्स्थासां कर्म इति सूत्रं सोदाहणं प्रतिपाद्यताम् |
| 19 | तमब्ग्रहणं किम्, गङ्गायां घोष इति व्याख्यायताम्। |

| | |
|---|---|
| 20 | दिवः कर्म च इति सूत्रं व्याख्यायताम् । |
| 21 | सहयुक्ते अप्रधाने इति सूत्रं व्याख्यायताम् । |
| 22 | कर्मणा यमभिप्रैति स सम्प्रदानमिति सूत्रं शेखरदिशा विविच्यताम् । |
| 23 | भार्यामीर्ष्यतित उदाहरणं सप्रसङ्गं स्पष्टीक्रियताम् । |
| 24 | नमः स्वस्तिस्वाहास्वधा... सूत्रं प्रपूर्य व्याख्यायताम् । |
| 25 | तदपादानमुच्यते इति कारिकां प्रपूर्य विस्तरेण प्रतिपाद्यताम् । |
| 26 | भीत्रार्थानां भयहेतुः इति सूत्रं शेखरदिशा निरूप्यताम् । |
| 27 | वारणार्थानामीप्सितः इति सूत्रं सोदाहरणं व्याख्यायताम् । |
| 28 | षष्ठी शेषे इति सूत्रं सोदाहरणं विवेचयतु । |
| 29 | दिवस्तदर्थस्य इति सूत्रं व्याख्यायताम् । |
| 30 | आधारोधिकरणमिति सूत्रं स्पष्टीक्रियताम् । |
| | LONG QUESTION |
| 1 | प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा इति सूत्रे परिमाणपदस्य किमुदाहरणमिति प्रतिपादयत। |
| 2 | लाक्षणिकपदे कथं प्रथमासिध्यतीति समर्थ्यताम् । |
| 3 | द्विकं प्रातिपदिकार्थः इति पक्षस्य मूलं प्रदर्श्य उदाहरणं प्रदर्शयत । |
| 4 | प्रातिपदिकार्थलिङ्ग... इति सूत्रं विलिख्य व्याख्यायताम् । |
| 5 | सम्बोधने च इति सूत्रं सप्रयोजनं प्रस्तूयताम् । |
| 6 | कारके इति सूत्रं व्याख्यायताम् । |
| 7 | कर्तुरीप्सिततमं कर्म इति सूत्रे कर्तृपदं प्रयोजनपुरस्सरं प्रतिपाद्यताम् । |

| | |
|---|---|
| 8 | ईप्सिततममिति पदं व्याख्यायताम् । |
| 9 | हरिं भजति, हरिः सेव्यते उदाहरणद्वयं स्पष्टीक्रियताम् । |
| 10 | पयसौदनं भुङ्क्ते उदाहरणावसरं प्रतिपाद्य यथार्थ्यं विविच्यताम् । |
| 11 | अनीप्सितपदार्थं निरूप्य भेदान् प्रदर्श्य उदाहरणानि व्याख्यायन्ताम् । |
| 12 | दुहादीनां कर्मयुक्तत्वं विचार्यताम् । |
| 13 | अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योध्वा कर्मसंज्ञक इति वाच्यमिति वचनं व्याख्यायताम् । |
| 14 | ण्यन्तस्थले कर्मसंज्ञाविधानव्यवस्थां विव्रियताम् । |
| 15 | लक्षणेत्थं भूताख्यानभागवीप्सासु प्रतिपर्यनवः इति सूत्रं व्याख्यायताम् । |
| 16 | रुच्यर्थानां प्रीयमाणः इति सूत्रं व्याख्यायताम् । |
| 17 | क्रियार्थोपपदस्य कर्मणि स्थानिनः इति सूत्रं व्याख्यायताम् । |
| 18 | हेतौ इति सूत्रं व्याख्यायताम् । |
| 19 | उपपदविभक्तेः कारकविभक्तिर्वलीयसी इति परिभाषां सोदाहरणं प्रतिपाद्यताम् । |
| 20 | मन्यकर्मण्यनादरे विभाषाऽप्राणिषु सूत्रं व्याख्यायताम् । |
| 21 | जुगुप्साविरामप्रमादार्थानामुपसंख्यानमिति वार्तिकं व्याख्यायताम् । |
| 22 | विभाषा गुणेऽस्त्रियाम् सूत्रं सोदाहरणं व्याख्यायताम् । |
| 23 | रुजार्थानां भाववचनानामज्वरेः सूत्रं व्याख्यायताम् । |
| 24 | न लोकव्ययनिष्ठाखतर्थतृनाम् सूत्रं व्याख्यायताम् । |
| 25 | यस्य च भावेन भावलक्षणमिति सूत्रं व्यख्यायताम् । |

**DEPARTMENT OF SANSKRIT VYAKARNA**
**PROGRAMME: MASTER OF ARTS**
**SEMESTER:  IV SEMSETER**

| SL NO | QUESTION |
|---|---|
| | **SHORT QUESTION** |
| 1 | सुपां सुपा इत्यस्य किं तात्पर्यम् ? |
| 2 | समासस्तु चतुर्धेति कस्य कतम् ? |
| 3 | कटप्रूः इत्यत्र समासविधायकं वचनं किम् ? |
| 4 | षड्विधसामासविभाजनस्य कः आधारः? |
| 5 | द्वे वृत्ती के ? |
| 6 | न जहति पदानि स्वार्थं यस्यां सा ? |
| 7 | स विशेषणानां वृत्तिर्न इति सम्पूर्णं वचनं लिखत। |
| 8 | समासे कीदृशी शक्तिः ? |
| 9 | व्युत्पत्तिभञ्जनम् इत्यत्र व्युत्पत्तिपदार्थः क ? |
| 10 | निषादस्थपतिः अत्र कः समासः सिद्धान्तसिद्धः ? |
| 11 | इन्द्रियाणां कुत्र योग्यता ? |
| 12 | शक्तिलक्षणं किम् ? |
| 13 | सङ्केतः शक्तिग्रहणे स्वरूपेण हेतुर्भवति न वा ? |
| 14 | लौकिकभाषाशब्देषु शक्तिः मन्यते न वा ? |
| 15 | असाधुरनुमानेन वाचकः कैश्चिदिष्यते अत्र कैश्चित् पदेन कस्य ग्रहणम् ? |
| 16 | वाक्यपदीयकारः कः ? |

| | |
|---|---|
| 17 | पुण्यपापनियमः केषां मते ? |
| 18 | ब्राह्मणाय देहि इति स्थाने ब्राह्मणं देहि इति लक्षणया साधुमन्यते न वा ? |
| 19 | शक्तिग्राहकशिरोमणिः कः ? |
| 20 | समयात् योग्यता अत्र समयात् पदार्थः कः ? |
| 21 | नञर्थः इति पदे कः समासः कश्च विग्रहः ? |
| 22 | असर्वः इत्यत्र गौणत्वे कथं सर्वनामसंज्ञा ? |
| 23 | घटो नास्ति अस्यार्थः कः ? |
| 24 | नञर्थस्थले विशेष्यविशेषणभावो कथं स्वीक्रियते ? |
| 25 | नञर्थः कति प्रकीर्तिताः ? |
| 26 | निपातविषये किं किं मतं विद्यते ? |
| 27 | प्रादिचादिषु विशेषणसम्बन्धो भवति न वा ? |
| 28 | शरैरुस्रैरिवोदीच्यान् अत्र उस्रैरित्यत्र कीदृशी तृतीया ? |
| 29 | चादीनां निपातानां प्रातिपदिकसंज्ञा केन सूत्रेण ? |
| 30 | निपातस्य का परिभाषा ? |
| 31 | सम्बन्धाभिधानं केन प्रत्ययेन भवति ? |
| 32 | राजपुरुषत्वम् इत्यस्य कोऽर्थः? |
| 33 | सत्ता शब्दस्य का व्युत्पत्तिः ? |
| 34 | त्वादयो प्रत्ययाः कमाश्रित्य जायन्ते ? |

| | |
|---|---|
| 35 | घटत्वमित्यस्य कोऽर्थः ? |
| 36 | हरिहरनलेक्ष्वाकु इत्यादिस्थले द्रव्ये अर्थः प्रकारो भवति शब्दो वा ? |
| 37 | सास्य देवता सूत्रेण विहितस्य प्रत्ययस्य कोर्थः? |
| 38 | निरूढपदस्य का परिभाषा ? |
| 39 | जिज्ञासा अनुभवसिद्धा भवति न वा ? |
| 40 | ग्रहं सम्मार्ष्टि उद्देश्यगतमेकत्वं विवक्षितमविवक्षितं वा ? |
| 41 | अतिनिष्कर्षत्वं कस्मिन् स्फोटे विद्यते ? |
| 42 | कतिविधः स्फोटः ? |
| 43 | वैयाकरणानां मते वाचकत्वं स्थानिनि आदेशे वा ? |
| 44 | नैयायिकानां मते वाचकत्व कुत्र मन्यते ? |
| 45 | पदस्फोटः कुतः स्फुटः ? |
| 46 | हरेऽव दृष्ट्वा किं विनिश्चिनु ? |
| 47 | अखण्डस्फोटस्वरूपं किम् ? |
| 48 | शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम् इति कारिका पूर्यताम् । |
| 49 | जातिस्फोटः कः ? |
| 50 | नामरूपे व्याकरवाणि इति श्रुत्या कति प्रकारिका सृष्टिः परिकल्पिता ? |
| | SHORT NOTE |
| 1 | समासः षड्विधो बुधैः, इति वचनं व्याख्यायताम् । |

| | |
|---|---|
| 2 | जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती .. इति विव्रियताम् । |
| 3 | समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्, इति कारिका व्याख्येया । |
| 4 | आख्यातं तद्धितकृतयोर्यत्किञ्चिदुपदर्शकम्, इति कारिका स्वगिरा व्याख्येया । |
| 5 | पर्यवस्यच्छाब्दबोधाविदूरप्राक्क्षणस्थिते, इति कारिकां प्रपूर्य व्याख्यायताम् । |
| 6 | समासस्य विग्रहचिन्तनम् क्रियताम् । |
| 7 | इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा, इति कारिका विवेचनीया । |
| 8 | असाधुरनुमानेन वाचकः कैश्चिदिष्यते, इति तात्पर्यं प्रतिपादनीयम् । |
| 9 | लौकिकभाषासु वाचकत्वशक्तिं सप्रमाणं विचारयतु । |
| 10 | लौकिकव्यवहारे शब्दः कथं कार्यं साधयति इति प्रतिपाद्यताम् । |
| 11 | शक्तिग्राहकतत्त्वानि विचार्यन्ताम् । |
| 12 | शब्दशक्तिचिन्तनं प्रतिपाद्यताम् । |
| 13 | नञ्समासे चापरस्य प्राधान्यात् सर्वनामता । इति कारिका व्याख्येया । |
| 14 | अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशयात्, इति विस्तीर्यताम् । |
| 15 | तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता, इयं कारिका सोदाहरणं व्याख्येया । |
| 16 | द्योतकाः प्रादयो येन निपाताश्चादयस्तथा, इति कारिका व्याख्येया । |
| 17 | तथान्यत्र निपातेपि लकाराः कर्म्मवाचकः, इति कारिका व्याख्यायताम् । |
| 18 | निपातानां वाचकत्वमन्वयव्यतिरेकयोः इति कारिका व्याख्येया । |
| 19 | कृत्तद्धितसमासेभ्यो मतभेदनिबन्धनम् । इति कारिका व्याख्येया । |

| | |
|---|---|
| 20 | प्रयोगोपाधिमाश्रित्य प्रकृत्यर्थे प्रकारताम्, इति कारिका व्याख्येया । |
| 21 | प्रत्ययार्थस्यैकदेशे प्रकृत्यर्थो विशेषणमिति, कारिका व्याख्येया । |
| 22 | क्रीडायां णस्तदस्यास्तीत्यादावेषैव दिक् स्मृता, इति श्लोकः व्याख्येयः । |
| 23 | अभेदैकत्वसंख्याया वृत्तौ भानमिति स्थितिः, इति व्याख्यायताम् । |
| 24 | लक्ष्यानुरोधात् संख्यायास्तन्त्राऽतन्त्रे मते यतः इति कारिका व्याख्येया । |
| 25 | अव्ययकृत इत्युक्तेः प्रकृत्यर्थे तुमादयः,  इति कारिका व्याख्येया । |
| 26 | वाक्यस्फोटेति निष्कर्षे तिष्ठतीति मतस्थितिः, इति कारिका व्याख्येया । |
| 27 | स्फोटभेदान् सलक्षणं प्रतिपादयतु । |
| 28 | पदस्फोटः प्रतिपाद्यताम् । |
| 29 | अखण्डस्फोटस्वरूपं विचार्यताम् । |
| 30 | स्फोटसारांशं लिखतु । |
| | LONG QUESTION |
| 1 | समासस्वरूपं विमृष्यताम् । |
| 2 | समासशक्तिः विचार्यताम् । |
| 3 | प्राचीनसमासलक्षणं विलिख्य सिद्धान्तं साधयतु । |
| 4 | व्यपेक्षावादिनः नैयायिकाः तेषां मते समासशक्तिं साधयतु । |
| 5 | निषादस्थपत्यधिकरणसिद्धान्तं स्वगिरा लिखन्तु । |
| 6 | शब्दशक्तिसिद्धान्तं साधयतु । |
| 7 | आधुनिकदेवदत्तादिनाम्नि कथं शक्तिः साध्यते । |

| | |
|---|---|
| 8 | प्रादेशिकभाषासु शब्दशक्तिविचारः प्रस्तूयताम् । |
| 9 | नैयायिकाः शब्देषु शक्तिं कथं स्वीकुर्वन्ति । |
| 10 | लोकव्यवहारस्य शक्तिग्राहकशिरोमणित्वं साध्यताम् । |
| 11 | नञर्थः विचार्यताम् । |
| 12 | विशेषणीभूतसर्वशब्देषु सर्वनामत्वं विमृष्यताम् । |
| 13 | घटो नास्ति , अब्राह्मणः इत्यादि स्थले नञर्थविचारः क्रियताम् । |
| 14 | अत्वं पचसि । अनहं भवामि इत्यादि स्थले नञर्थविचारपूर्वकं क्रियाकारकसम्बन्धविचारः प्रस्तूयताम् । |
| 15 | निपातार्थः विचार्यताम् । |
| 16 | त्वादिभावप्रत्ययार्थः विचार्यताम् । |
| 17 | देवताप्रत्ययार्थः विचार्यताम् । |
| 18 | अभेदैकत्वसंख्याया निर्णयः इति व्याख्यायताम् । |
| 19 | संख्याविवक्षाप्रकरणं विविच्यताम् । |
| 20 | क्त्वाद्यर्थः विचार्यताम् । |
| 21 | स्फोटस्य लक्षणं भेदांश्च विवेचयतु । |
| 22 | प्रकृतिप्रत्ययस्फोटः (वर्णस्फोटः) विविच्यताम् । |
| 23 | पदस्फोटस्य प्रक्रियां विवेयतु । |
| 24 | वाक्यस्फोटे अर्थनिरूपणप्रक्रियां सम्पादयतु । |
| 25 | जातिस्फोटः विवेचनीयः । |